कारमञ्जिं पुच्छ ललाठे यस्य भा० । ललामम्" । कात्या०२०।१।२२। "नीलपौण्ड्रकयुक्तमिति" कर्क० । तस्योत्सर्ज्जनं चोत्तरपूर्व्वदिशि। "पशुवदुत्सर्ज्जनं निरष्टे ऽश्वशते" कात्या०२०।२।१ । "पशुवदित्युत्तरपूर्व्वा दिग् लक्ष्यते निरष्टे निरमणे वृद्धतया । अध्वर्य्युयजमानौ अश्वशते शतानामप्यश्वानां मध्ये पशुवदुत्सर्ज्जनं कुरुतः कीदृशे निरष्टे अश्वस्य वयोव्यञ्जनानि एकैकं त्रीणि त्रीणि वर्षाणि अनुवर्त्तन्ते तानि निर्गतान्यस्मादिति निरष्टम् अतीतचतुर्विंशतिवर्षमित्यर्थः" कर्कः । तेन वृद्धतया स्कन्दनसामर्थ्यराहित्यं सूचितम् तथा हि तस्याश्वस्य "बडवाभ्यो वारणम्" "प्रस्नेयाच्चोदकात्" कात्या०२०।२।१।२।३। वाक्येन वड़वाभ्यो निवारणं, प्रस्नेयात् यथेच्छस्नानार्हादुदकाच्च निवारणम् विहितम् । अतएव "प्रजाते वायव्यम्" कात्या० २०।३।२० । बड़वायां रेतःस्कन्दने प्रजातइत्युच्यते तस्मिन् वायव्यपयोनिर्वापोविहितः। तस्य रक्षकाश्च यथारूपाः कर्त्तव्यास्तथाह शत०ब्रा० । "तस्यैते पुरस्ताद्रक्षितार उपकॢप्ता भवन्ति । राजपुत्राः कवचिनः शतं राजन्या निषङ्गिणः शतं सूतग्रामण्याः पुत्रा इषुपर्षिणः शतं क्षात्रसंग्रहीतृणां पुत्रा दण्डिनः शतमश्वशतं निरष्टं निरमणं यस्मिन्नेनमपिसृज्य रक्षन्ति" अवधिकालमाह "तस्मात् पारिप्लवं षट्त्रिंशतं दशाहानाचष्टे" इति शत०ब्रा० सावनगणनया संवत्सरे गते दीक्षा । "अश्वापदीज्या चरुभिः सावित्रम्" इत्यादिना "सूतेचादर्शने च" इत्यन्तेन कात्या०२०,३,२०। प्रायश्चत्तविशेषानुक्त्वा "अन्यस्य रशनादानादि करोत्यश्वयुक्तम्" सूते अश्वस्यादर्शने च" का०२०,४,१। अपुनरागमसम्भवे च अन्यस्याश्वस्य रशनादानादि अश्वयुक्तमश्वसंबन्धि अश्वोपकारकं सर्व्वं कर्म्म पुनः करोति" कर्कः। अश्वमेधारम्भकालश्च। "अष्टम्यां नवम्यां वा फाल्गुनीशुक्लस्य" कात्या०२०,१,२, फाल्गुनशुक्लपक्षेऽष्टम्यां नवम्यां वा प्रारम्भः । "याऽसौ फाल्गुनी पौर्णमासी भवतीति" प्रकृत्य 'तस्यै पुरस्तात् षड़हे वा सप्ताहे वा ऋत्विज उपसमायन्तीति" शत० ब्रा० ग्रीष्मे त्वेके" कात्या० २०,१,३, "ज्यैष्ठाषाड़योः शुक्लाष्टम्यां नवम्यां वेत्येके" कर्कः। एकविंशतियूपसन्निवेशमानादि यथा 'एकविंशतिर्यूपाः सर्व्वे एकविंशत्य रत्नयोराज्जुद्दालोऽग्निष्ठो भवति पैतुदारवावभितः, षड्बैल्वास्तय इत्यात्तय इत्यात्,षट् खादिरास्तय एवेत्यात्तय इत्यात्,षट् पालाशास्तय एवेत्यात्तय इत्यात्, शत०ब्रा० । एतेषां नामनिर्व्वचनं तत्रैव दृश्यम् ।

अश्वमेधस्य यौगिकानि द्वादश नामानि दर्शितानि शत० ब्रा० १३काण्डे । "एष वै प्रभूर्नाम यज्ञः१ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव प्रभूतं भवति । एष वै विभूर्नाम यज्ञः२ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव विभूतं भवति । एष वै व्यष्टिर्नाम यज्ञः३ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव व्यष्टं भवति । एष वै विधृतिर्नाम यज्ञः४ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव विधृतं भवति । एष वै व्यावृत्तिर्नाम यज्ञः५ । यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्यावृत्तं भवति । एष वा ऊर्जस्वन्नाम यज्ञः६ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेवोर्जस्वद्भवति । एष वै पयस्वान्नाम यज्ञः७ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव पयस्वद्भवति । एष वै ब्रह्मवर्चसी नाम यज्ञः८ । यत्रैतेन यज्ञेन यजन्त आब्राह्मणो ब्रह्मवर्चसी जायते । एष वाअतिव्याधिर्नाम यज्ञः९ । यत्रैतेन यज्ञेन यजन्त आराजन्योऽतिव्याधिर्जायते । एष वै दीर्घो नाम यज्ञः१० । यत्रैतेन यज्ञेन यजन्तऽआदीर्घारण्यं जायते । एष वै कॢप्तिर्नाम यज्ञः११ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव कॢप्तं भवति । एष वै प्रतिष्ठा नाम यज्ञः१२ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव प्रतिष्ठितं भवति" ।'तरति ब्रह्महत्यां योऽश्वमेधेन यजते" शत०ब्रा० "अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे" भा०अश्व०प०।

**अश्वमेध** पु० अश्वमेधोऽस्त्यस्य अर्श० अच्। राजर्षिभेदे । "यो मद्दति प्रवोचत्यश्वमेधाय सूरये" ऋ० ५,२७,४ । अश्वमेधाय राजर्षये" भा० ।

**अश्वमेधिक** न० अश्वमेधमधिकृत्य कृतः ग्रन्थः ठक् ठन् वा । महाभारान्तर्गते चतुर्द्दशे पर्व्वणि । "ततोऽश्वमेधिकं पर्व सर्वपापप्रणाशनम्" "ततोऽश्वमेधिकं पर्व प्रोक्तं तच्च चतुर्द्दशम्" इति च भा०आ०प० ।

**अश्वमेधीय** पु० अश्वमेधाय हितः "अश्वमेधाच्छ च" पा०छ । अश्वमेधयोग्ये पशौ तल्लक्षणम् अश्वमेधशब्दे उक्तम्। चात् ठन् । अश्वमेधिकोऽप्युक्तार्थे ।

**अश्वया** स्त्री अश्वमिच्छति अश्व—क्यच् "न छन्दस्यपुत्रस्येति" पा० नेत्त्वदीर्घौ भावे अ । हयेच्छायाम् "अपुराश्वयोत रथया" ऋ० ८,४६,१०। "अश्वया अश्वेच्छया" भा० ।

**अश्वयु** त्रि० अश्वोऽस्त्यस्य युच् । १अश्वयुक्ते "गव्युरश्वयुरीयते" ऋ० ३१,१५ । अश्वमिच्छति क्यच् वेदे नि०नेत्त्व दीर्घौ उन् । २अश्वेच्छावति । अश्वयुर्गव्यूरथयुः" ऋ० १,२१,१४ । "अश्वयुरश्वानिच्छन्" भा० ।